# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2017 - '18

**Class : VII** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्डः क - अपठित अवबोधनम् - 10
खण्डः ख - रचनात्मक कार्यम् - 15
खण्डः ग - अनुप्रयुक्त व्याकरणम् - 25
खण्डः घ - पठित अवबोधनम् - 30

## खण्डः क - अपठित अवबोधनम्

**I. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

मम ग्रामस्य समीपे एकः सरोवरः अस्ति। तस्य नाम 'पम्पा' अस्ति। तस्मिन् कमलानि विकसन्ति। तत्र मीनाः क्रीडन्ति। कच्छपाः तरन्ति। सरोवरस्य समीपे एकः विशालः वटवृक्षः अस्ति। तस्मिन् वानराः कूर्दन्ति, बालाः वानरान् पश्यन्ति। तत्र बकाः अपि सन्ति। सरोवरस्य समीपे एकं सुन्दरम् उद्यानम् अस्ति। उद्याने पुष्पाणि विकसन्ति। तत्र मयूराः भ्रमन्ति। एकत्र बालकाः पादकन्दुकेन क्रीडन्ति। अन्यत्र जनाः भ्रमन्ति। मृगाः सरोवरे जलं पिबन्ति। कोकिलाः कूजन्ति। रमणीयः सरोवरः उद्यानं च।

**प्रश्नाः**

**1. एकपदेन उत्तरत।** **2**

a) सरोवरस्य समीपे किम् अस्ति?
b) बालकाः केन क्रीडन्ति?
c) उद्यानं कीदृशम् अस्ति?
d) कोकिलाः किं कुर्वन्ति?

**2. पूर्णवाक्येन उत्तरत।** **4**

a) ग्रामस्य समीपे कः अस्ति?
b) सरोवरे कच्छपाः किं कुर्वन्ति?

**3. प्रदत्तविकल्पेभ्य: उचितं उत्तरं चित्वा लिखत।** **2**

a) के कूर्दन्ति?
(नरा:, वानरा:, मीना:, कच्छपा:)

b) 'सरोवरस्य' विभक्ति चिनुत।
(प्रथमा, तृतीया, षष्ठी, सप्तमी)

c) 'सरोवर:' इति पदस्य विशेषणं किम्?
(एक:, द्वौ, त्रय:, पञ्च)

d) 'पुष्पम्' पर्याय: क:?
(नेत्रम्, युगम्, सुमम्, रूपम्)

**4. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्ड: ख - रचनात्मककार्यम्

**II. स्व विद्यालयस्य वार्षिकोत्सवं वर्णयन्त: मित्रं प्रति लिखिते पत्रे मञ्जूषात: उचितपदै: रिक्तस्थानानि पूरयत।** **5**

केन्द्रिय विद्यालयत:
a) ---------
दिनाङ्क: b) --------

प्रिय मित्रं c) ---------
d) -----------
भवत: पत्रं प्राप्तम्। अहं स्वविद्यालयस्य e) ---------- वर्णयामि। एकमासपूर्वमेव f) --------- सर्वे अध्यापका: g) --------- च कार्येषु व्यस्ता: आसन्। उपायुक्तमहोदय: कार्यक्रमस्य h) ---------- आसीत्। स: विद्यालयम् अतीव प्राशंसत्। योग्येभ्य: छात्रेभ्य: च i) ---------- अयच्छत्। पितृभ्याम् नम:।

भवत: j) --------
सुरेश:।

मञ्जूषा:

| |
|---|
| पुरस्कारान्, दिल्लीत:, सप्रेमनम:, छात्रा:, सुहृद्, रमेश, मुख्यातिथि:, 21-3-2018, विद्यालयस्य, वार्षिकोत्सवम् |

**III. अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दानां सहायतया पञ्च वाक्यानि लिखत।** **10**

मञ्जूषा:

| |
|---|
| छात्रा:, प्रसन्ना:, पुस्तकस्यूतानि, हरिताभा, उपविशति, संलापं, पादकन्दुकं, हस्ते, क्रीडाक्षेत्रम्, समीपम् |



अथवा

मञ्जूषायां प्रदत्त शब्दानां साहाय्येन वृक्षस्य महत्त्वम् इति विषयम् अधिकृत्य पञ्च संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत।

मञ्जूषा

| |
|---|
| छायाम्, वातावरणम्, प्राणवायुम्, आतपे, तिष्ठन्ति, खगाः, फलानि, शुद्धम्, प्रसन्नाः, सत्पुरूषाः, इव |

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**IV. अधोलिखित वाक्येषु रेखाङ्कित पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।** **4**

a) शोभने! अहमपि त्वया सह विदेशम् आगमिष्यामि।

b) अध्यापिका एक + एकं छात्रम् उपादिशत्।

c) क्रीडायां मग्ना बालिका मत्समीपम् आगच्छत्।

d) काल + अन्तरे वर्णचित्रस्य शोभा नश्येत्।

**V. कोष्ठकात् उचित धातुपदेन वाक्यानि पूरयत।** **4**

a) छात्राः प्रतिदिनं गृहकार्याणि ---------। (कृ-लृट्)
(करिष्यति, करिष्यसि, करिष्यन्ति, करिष्यामि)

b) माता पुत्रं -----------। (पठ् + णिच् + लट्)
(पाठयसि, पाठयामि, पाठयन्ति, पाठयति)

c) आपणिकेन गृहं ---------। (गम् + आत्मनेपदी)
(गम्यते, गच्छति, गम्यन्ते, गच्छन्ति)

d) एतत् नगरं विस्तृतम् ---------। (अस् – लट्)
(अस्मि, अस्ति, असि, आसीत्)

**VI. प्रदत्तविकल्पेभ्यः उचितपदं चित्वा रिक्तस्थानानि पूरयत।** **4**

a) सैनिकैः देशस्य रक्षा --------। (कृ + तव्यत्)
(कर्तव्यं, कर्तव्या, कर्तव्यानि, कर्तव्ये)

b) प्रातः उद्याने ---------। (भ्रम् + अनीयर्)
(भ्रमणीया, भ्रमणीयानि, भ्रमणीयं, भ्रमणम्)

c) कदा विद्यालयः ----------। (गम् + तव्यत्)

(गन्तव्यः, गन्तव्यम्, गन्तव्यानि, गमनीयाम्)

d) बालिकया पत्रिका पठनीया।

(पठ् + क्त्वा, पठ् + ल्यप्, पठ् + अनीयर्, पठ् + तव्यत्)

**VII. अधोलिखित वाक्यानि कर्तृवाच्ये / कर्मवाच्ये परिवर्तनं कुरुत। 3**

a) पुत्रः जनकं सेवते। पुत्रेण जनकः ---------।

b) एकेन कर्मकरेण कार्यालयः गम्यते।

एकः कर्मकरः कार्यालयं ---------।

c) छात्रः पुस्तकं नयति।

छात्रेण पुस्तकं ---------।

**VIII. अधोलिखित वाक्येषु रिक्तस्थानानि कालबोधक शब्दैः पूर्यन्ताम्। 2**

a) अहं -------- (5.00) उत्तिष्ठामि।

b) ----------- (8.00) विद्यालयं गच्छामि।

**IX. मञ्जूषायां प्रदत्त अव्ययशब्दैः वाक्यानि पूरयत। 4**

(अपि, प्रातः, अधुना, श्वः)

a) -------- कः समयः?

b) अद्य शनिवासरः भवति। -------- रविवासरः भविष्यति।

c) गीता गीतं पठति। रमा --------- गीतं पठति।

d) सरिता ---------- भ्रमणं करोति।

**X. अधोलिखित वाक्येषु अशुद्धपदं संशोध्य लिखत। 4**

a) सुन्दरः बालिका गच्छति।

b) अत्र उन्नतं मार्गः अस्ति।

c) वृक्षः अतिसुन्दरंम् अस्ति।

d) ते बालकाः शोभनः अस्ति।

## खण्डः घ - पठित अवबोधनम्

**XI. अधोलिखित गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानामुत्तरं लिखत।**

**अ. गद्यांशः**

एकं वनम् आसीत्। तस्मिन् वने प्रचुराः वृक्षाः आसन्। वृक्षेषु खगाः नीडान् निर्माय सुखेन वसन्ति स्म। खगाः स्व-शाबकैः सह दिने इतस्ततः भ्रमित्वा रात्रौ नीडेषु आगच्छन्ति स्म। तत्र वानराः अपि वसन्ति स्म।

एकदा महती वृष्टिः अभवत्। वृष्टिकाले वानराः वृक्षस्य अधः आसन्। ते वृष्टिजलेन आर्द्राः अभवन्। आर्द्रता कारणात् ते कम्पिताः आसन्। वृष्टिकाले खगाः स्व स्व नीडेषु सुरक्षिताः आसन्।

**1. एकपदेन उत्तरत। 2**

a) वने कीदृशी वृष्टिः अभवत्?

b) के नीडं निर्माय वसन्ति?

**2. एकवाक्येन उत्तरत।** **2**

कुतः वानराः आर्द्राः अभवन्?

**3. प्रदत्त विकल्पेभ्यः उचितमुत्तरं लिखत।** **2**

a) 'आर्दता कारणात् ते कम्पिताः आसन्' अस्मिन् वाक्ये 'ते' पदं केभ्यः प्रयुक्तम्?
(जलेभ्यः, खगेभ्यः, वानरेभ्यः, कालेभ्यः)

b) 'उपरि' विलोमशब्दः गद्यांशात् चित्वा लिखत।
(उपरि, समीपे, दूरे, अधः)

c) 'सुरक्षिताः' अस्य विशेषणपदं किम्?
(वानराः, खगाः, वृक्षाः, वनानि)

d) प्रचुराः वृक्षाः – 'प्रचुर' शब्दस्य समानपदं चिनुत।
(बहुलाः, विरलाः, विरसाः)

**आ. पद्यांशः**

राज्यरहितः भूपालः व्यर्थः।
तपोरहितः भिक्षुः व्यर्थः ॥
मुष्टिरहितः कृपाणः व्यर्थः।
बाणः वक्षरहितः व्यर्थः ॥
वेदरहितः ब्राह्मणः व्यर्थः।
वृक्षः फलरहितः व्यर्थ ॥

**1. एकपदेन उत्तरत।** **2**

a) कीदृशः ब्राह्मणः व्यर्थः?

b) कीदृशः वृक्षः व्यर्थः?

**2. एकवाक्येन उत्तरत।** **2**

कीदृशः भिक्षुः व्यर्थः?

**3. प्रदत्तविकल्पेभ्यः उचितमुत्तरं चित्वा लिखत।** **2**

a) 'सहितः' अस्य कः विलोमपदः श्लोके प्रयुक्तः?
(राज्यम्, फलम्, रहितः, कृपाणः)

b) 'निष्फलम्' समानार्थः कः?
(तपोरहितः, फलरहितः, मुष्टिरहितः, राज्यरहितः)

c) 'पक्षाभ्यां रहितः' एकपदं किम्?
(पक्षरहितः, वेदरहितः, तपोरहितः, मुष्टिरहितः)

d) 'पादपः' पर्यायवाचि पदं अत्र प्रयुक्तम्।
(बाणः, तपः, ब्राह्मणः, वृक्षः)

**इ. नाटयांशः**

अनुभा – लक्ष्मि! त्वं कदा जागरणं करोषि?

लक्ष्मी – अहं चतुर्वादने जागरणं करोमि।
अनुभा – मामपि जागरयतु। अहं विलम्बेन निद्रां करोमि।
लक्ष्मी – त्वं कदा व्यायामं अध्ययनं च करोषि?
अनुभा – अहं व्यायामं न करोमि। सार्धषड्वादनतः नववादनपर्यन्तं अध्ययनं करोमि।
लक्ष्मी – एतत् समीचीनं नास्ति। शरीरस्य मनसः च कृते व्यायामः परमावश्यकः प्रतिदिनं करणीयः एक।
अनुभा – भवतु, श्वः आरभ्य करिष्यामि। तव कक्षा कदा पर्यन्तं प्रचलति?
लक्ष्मी – मम कक्षा सपादचतुर्वादनपर्यन्तं प्रचलति। तदनन्तरं अहं छात्रावासं आगच्छामि। पञ्चवादने पुनः भ्रमणार्थं वाटिकां गच्छामि।

**1. एकपदेन उत्तरत।** **2**

a) लक्ष्मी पञ्चवादने कुत्र गच्छति?

b) लक्ष्मी कदा जागरणं करोति?

**2. एकवाक्येन उत्तरत।** **2**

व्यायामस्य आवश्यकता किमस्ति?

**3. प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत।** **2**

a) 'समाप्य' कः विलोमपदः अत्र प्रयुक्तम्?
(पर्यन्तं, आरभ्य, समीचीनम्)

b) अहं चतुर्वादने जागरणं करोमि। अस्मिन् वाक्ये 'अहं' शब्दं कस्मै प्रयुज्यते?
(अनुभायै, लक्ष्म्यै, बालिकायै)

c) 'कृते' इति पदस्य योगे का विभक्तिः प्रयुज्यते?
(प्रथमा, चतुर्थी, षष्ठी, सप्तमी)

d) नास्ति सन्धिच्छेदः कः?
(ना + आस्ति, न + अस्ति, ना + असती)

**XII. रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

a) कस्मिंश्चित् नगरे एकः ब्राह्मणः निवसति स्म।

b) ईश्वरस्य अनुकम्पया कुशलिनः इति भावयामि।

c) भिक्षाटनं कृत्वा स उदरं पालयति स्म।

d) मूर्खाणां उपदेशः प्रकोपाय भवति।

**XIII. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित श्लोकद्वयस्य अन्वयं पूरयत।** **4**

मञ्जूषा
(शान्तये, भुजङ्गानां, असम्भाव्यां, शेते, हि, उपदेशः, पिता, करोति)

क. उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥
अन्वयः
मूर्खाणां a) -------- प्रकोपाय b) --------- न c) ----------। पयःपानं

d) ---------- केवलं विषवर्धनम्।

ख. अनागतवतीं चिन्तामसम्भाव्यां करोति यः।
स एव पाण्डुरः शेते सोमशर्मपिता यथा।
यः अनागतवतीं a) ---------- चिन्तां b) -----------। सः एव पाण्डुरः
c) --------- यथा सोमशर्म d) ----------।

**XIV. अधोलिखित कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत।** **4**

a) अग्रिमकाले गणितकाले गणितार्थं अधिकं अवधानं दास्यामि।
(श्रद्धा, विषमं, सन्तोषं, अश्रद्धा)

b) जनन्यै मम प्रणामाः।
(पुत्र्यै, मात्रे, सोदर्यै, कन्यै)

c) तेषां विक्रयेण सुवर्णं, सुवर्णेन भव्यं भवनं च निर्मापयिष्यामि।
(कठिनं, मृदुलं, सुन्दरं, विरूपं)

d) पञ्चवादने पुनः भ्रमणार्थं वाटिकां गच्छामि।
(भवनं, विद्यालयं, उद्यानं, प्रासादं)